# धन्याष्टकं

## dhanyaashhTakaM

तज्ज्ञानं प्रशमकरं यदिन्द्रियाणं
तज्ज्ञेयं यदुपनिषत्सु निश्चितार्थं ।
ते धन्या भुवि परमार्थनिश्चितेहाः
शेषास्तु भ्रमनिलये परिभ्रमन्तः ॥ १॥

आदौ विजित्य विषयान्मदमोहराग-
द्वेषादिशत्रुगमाहृतयोगराज्याः ।
ज्ञात्वा मतं समनुभूयपरात्मविद्या-
कान्तासुखं वनगृहे विचरन्ति धन्याः ॥ २॥

त्यक्त्वा गृहे रतिमधोगतिहेतुभूताम्
आत्मेच्छयोपनिषदर्थरसं पित्बन्तः ।
वीतस्पृहा विषयभोगपदे विरक्ता
धन्याश्चरन्ति विजनेषु विरक्तसङ्गाः ॥ ३॥

त्यक्त्वा ममाहमिति बन्धकरे पदे द्वे
मानावमानसदृशाः समदर्शिनश्च ।
कर्तारमन्यमवगम्य तदर्पितानि
कुर्वन्ति कर्मपरिपाकफलानि धन्याः ॥ ४॥

त्यक्त्वौषात्रयमवेक्षितमोक्षमर्गा
भैक्षामृतेन परिकल्पितदेहयात्राः ।
ज्योतिः परात्परतरं परमात्मसंज्ञं
धन्या द्विजारहसि हृद्यवलोकयन्ति ॥ ५॥

नासन्न सन्न सदसन्न महसन्न चाणु
न स्त्री पुमान्न च नपुंसकमेकबीजं ।
यैर्ब्रह्म तत्समनुपासितमेकचितैः
धन्या विरेजुरिते भवपाशबद्धाः ॥ ६॥

अज्ञानपङ्कपरिमग्नमपेतसारं
दुःखालयं मरणजन्मजरावसक्तं ।
संसारबन्धनमनित्यमवेक्ष्य धन्या

ज्ञानासिना तदवशीर्य विनिश्चयन्ति ॥ ७ ॥

सान्तैरनन्यमतिभिर्मधुरस्वभावैः
एकत्वनिश्चितमनोभिरपेतमोहैः ।
साकं वनेषु विजितात्मपदस्वरुपं
तद्वस्तु सम्यगनिशं विमृशन्ति धन्याः ॥ ८ ॥

॥ इति श्रीमद् शङ्कराचार्यविरचितं धन्याष्टकं समाप्तं ॥

---

Send corrections to Sorin Suciu aka SeSe at sorins@hotmail.com.